
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2504 विषय

नाव श्रीगुरुगिता

लेखक / लिपीकार

पृठ 32 काळ पूर्ण / अपूर्ण

M-2504

~~श्री६ [illegible]~~

श्री गुरुगीता प्रारंभः

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः श्रीम- ॥
त्सद्गुरवेनमः॥ श्रीसांबसदाशिवायनमः॥ श्री-
मातापित्रदेवताभ्योनमः॥ श्रीलक्ष्मीनृसिंहा-
यनमः॥ श्रीसीतारामचंद्रायनमः॥ हरिः ॐ-
नरहरे॥ अस्य श्री गुरुगीतास्तोत्रमंत्रस्य
॥ ॥

परमं शिव ऋषिः विराट् छंदः श्रीगुरुपरमात्मा-
देवता बीजं संशक्तिः क्रौं क्लीं जुं श्रीगुरुप्र
सादसिध्यर्थे जपे विनियोगः॥ अथ करन्यासः॥
ॐ हं सं सूर्यात्मने अंगुष्ठाभ्यां नमः॥ ॐ हं सौं
सोमात्मने तर्जनिभ्यां नमः॥ ॐ हं सं निरंज

नात्मने मध्यमाभ्यां नमः॥ ॐ हं सैं निराभा- ॥ २॥
सात्मने अनामिकाभ्यां नमः॥ ॐ हं सौं अंतनु सूक्ष्मा
त्मने कनिष्टिकाभ्यां नमः॥ ॐ हं सः अव्यक्तात्मने-
करतल कर पृष्टाभ्यां नमः॥ अथ षडंगन्यासः॥ ॐ
हं सं सूर्यात्मने हृदयाय नमः॥ ॐ हं सीं सोमा-

२॥

त्मेन शिरसे स्वाहा॥ ॐ हं सूं निरंजनात्मने शि-
खायवौषट्॥ ॐ हं सैं निराभासात्मने कवचा-
य हुं॥ ॐ हं सौं अंतनु सूक्ष्मात्मने नेत्रत्रयाय वौ-
षट्॥ ॐ हं सः अन्यकात्मने अस्त्राय फट्॥ अथ ध्यानं

हंसाभ्यां परिवृत्तपत्रकमलैर्दिव्यै जगत्कारणै विश्वोत्की- ॥ ३ ॥
र्णमनेकदेहनिलयं स्वच्छंदमात्मेच्छया ॥ तत्तद्योगतया
स्वेदशिकतनुश्री वैकदीपांकुरं प्रत्यक्षाक्षरनिग्रहं गुरु
पदं ध्यायेद्द्विबाहुं गुरुं ॥ १ ॥ विश्वंव्यापकमादिदेव
२ ॥ ममलं निसंपरां निष्कलं नित्योद्बुद्धसहस्रपत्रकमलै-

क्लिप्यक्षरै मंडपै ॥ निसानंदमनंत पूर्व माखिलं तत्स्थलं नित्यं

स्मेर दात्मानस्वमनुप्रविश्यकुहेरेस्वछंदंतः सर्वगः ॥ २ ॥

॥ इति ध्यानं २ ॐ कैलासीशिखरे रम्यभक्तिसाधननायकं ॥

प्रणम्य पार्वतीभक्त्या शंकरं परिपृच्छसि ॥ १ ॐ श्रीपार्वतिउवाच

ह्रीः ॐ श्रीभैरुवाच ॥ गुह्याद्गुह्यतरां विद्या गुरुगीताविसेषनः ॥ तत्प्रसादाच्छ्रोतव्यंतत्सर्वंब्रूहि मेसुत ॥

ॐ सूतउवाच

ॐ नमोदेवदेवेशपरात्परजगद्गुरो ॥ सदाशिवमहा ॥ ४ ॥
देवगुरुदीक्षांप्रदेहिमे ॥ ३ ॥ किंमार्गेणभोस्वामिन्दे-
हीब्रम्हमयोभवेत ॥ संकृपांकुरुमेस्वामिन्नमामि-
शरणंतव ॥ ४ ॥ ॐ ईश्वरउवाच ॥ ॐ यस्यदेवे
पराभक्तिर्यथादेवेतथागुरौ ॥ तस्यैते कथिद्यर्थाः प्रका

ज्ञाते माहात्मनः ॥५॥ ॐ गुकारस्त्वंधकारस्याद्रु-
कारस्तद्विनाशकृत ॥ अंधकारविनाशत्वाद्गुरुरित्य
भिधीयते ॥६॥ ममरुपासि देव त्वंमत्प्रीत्यर्थं वदाम्यहं ॥
लोकोपकारकः प्रश्नो नकेनापि कृतः पुरा ॥७॥ दुर्लभं त्रीषु
लोकेषु तच्छृणुष्व वदाम्यहं ॥ कींचि द्गुरुं विनानान्यत्सत्यं

॥ ५ ॥

सत्यंवदाम्यहं॥ ८॥ वेदशास्त्रपुराणानिइतिहासादिका-
निच॥ मंत्रयंत्रादिविद्यानांस्मृतिरुच्चाटनादिकं॥ ९॥
शैवशाक्तागमादीनीअन्येबहुमतानिच॥ अपभ्रं-
शसमस्तानिजीवानांभ्रांतचेतसां॥ १०॥ वेदशास्त्र

२ ॥

पुराणतनिकृत्वावैगुरुकाम्यया ॥ स्वयंलोकगु-
रुः साक्षाज्व्यासेतवेदतत्वावित ॥ ११ ॥ यज्ञंव्रतंतपोदा-
नंजपतीर्थंतथैवच ॥ गुरुतत्वमविज्ञाय मूढ-
स्तेचेतरेजना ॥ १२ ॥ गुरुबुद्ध्यात्मनोनान्यासत्सत्स

स्यंनसंशयः ॥ स्वलाभार्थं प्रयत्नेन कृतव्यंचमनो-
बिभि ॥१३॥ गुह्यविद्यां जगन्मायादेहमज्ञानसंभवं ॥ उ
दयस्वप्रकाशेन गुरुशब्देनकथ्यते ॥१४॥ देहोब्रम्ह भवे-
द्यस्मात्तत्कृतार्थंवदाम्यहं ॥ सर्वपापविशुद्धात्मा-

श्रीगुरोःपदसेवनात ॥१५॥ सर्वतीर्थावगाहस्य प्राप्नोति-
सफलंनरः ॥ गुरुपादोदकंपीत्वा ~~संसारार्णव~~-
~~तारकं~~ ॥१७॥ अज्ञानमूलहरणं जन्मकर्मनिवारणं ॥
ज्ञानवैराग्यसिद्ध्यर्थं गुरुःपादोदकंपिबेत ॥१८॥ गु
जलंशिरसीधारयेत ॥१९॥ शोषणंपापकंकस्य दीपनंज्ञानतेजसः ॥ गुरुपादोदकंपीत्वासंसारार्णवतारकं

रुपादोदकुंपानं गुरोरुच्छिष्टभोजनं ॥ गुरुमूर्तेः- ५७५
सदाध्यानं गुरुःस्तोत्रंसदापठेत ॥१८॥ काशीक्षेत्रेनि-
वासोसौ।जान्हवीचरणोदकं ॥ गुरुर्विश्वेश्वरःसा-
क्षाचारकंब्रम्हनिश्चितं ॥२०॥ शिरपादांकीतंकृत्वागया-
१७ ॥

स्तसोक्षयोवटः॥ तीर्थराजप्रयागोसौगुरुमू-
र्तिं नमोनमः॥ २१॥ गुरुमूर्तिंस्मरेन्नित्यंगुरुनामसदा-
जपेत्॥ गुरोराज्ञांप्रकुर्वीतगुरोरन्यंनभावयेत॥ २२॥
गुरुवक्त्रोस्थितंब्रम्हप्राप्यतेतत्प्रसादतः॥ गुरुमूर्त-

॥ ८ ॥

सदाध्यानं यथास्वैरिणि योषितः॥ २३ ॥ स्वाश्रमं च स्व-
जातिं च स्वकीर्तिं पुष्टिवर्धनं ॥ अन्यत्सर्वं परित्यज्य गुरु-
रन्यं न भावयेत् ॥ २४ ॥ अनन्याश्चिंतयंतो मां सुलभं परमं-
पदं ॥ तस्मात्सर्वप्रयत्नेन गुरोराधनं कुरु॥ २५ ॥ गुरुवक्त्रोस्थिता विद्या

गुरुभक्त्यानुलभ्यते ॥ त्रैलोक्यस्फुटवक्तारोदेवाद्याःसुरप-
न्नगाः॥२६॥ धृवंतेषांच सर्वेषां नास्तितत्वंगुरोःपरं ॥ गुका-
रस्त्वंधकारस्या द्रुकारस्तेजउच्यते ॥ अज्ञान ग्रासकंब्र-
म्ह गुरुरेवन संशयः॥२७॥ गुकारः प्रथमो वर्णो मायादिगु-

णभासकः ॥ रुकारो द्वितीयं ब्रह्म मायाभ्रांतिविमोचकः ॥ ९ ॥

॥ २८ ॥ एवं गुरुपदं श्रेष्टं देवानामपि दुर्लभं ॥ हाहा हूहू गणै-

श्चैव गंधर्वाद्यैश्च पूज्यते ॥ २९ ॥ एवं तेषां च सर्वेषां नास्ति-

तत्वं गुरोः परं ॥ आसनं शयनं वस्त्रं वाहनं भूषणादिकं

९ ॥

॥ ३० ॥ साधकेन प्रदातव्यं गुरोः संतोषकारकं ॥ गुरोरा-
राधनं कार्यं जीवित्वं वै निवेदयेत ॥ ३१ ॥ कर्मणा मनसा-
वाचा सद्भिराराधयेद्गुरुं ॥ दीर्घदंडनमस्कृत्य नत्वा-
गुरुसंनिधौ ॥ ३२ ॥ शरीरमर्थसंप्राप्तं पशुपुत्रग्रहाणि च-

॥ ४० ॥

आत्मदारादिकं चैव सद्गुरवे निवेदयेत ॥ ३३ ॥ कृमि-
कीटभस्मविष्ठादुर्गंधमलमूत्रकं ॥ श्लेष्मरक्तत्वमांसंच-
तन्नुशीथंवरानने ॥ ३४ ॥ संसारवृक्षमारूढाः पतंतिनर-
कार्णवे ॥ येनोद्धृतमिदं विश्वंतस्मै श्रीगुरवेनमः ॥ ३५ ॥

॥ ४० ॥

गुरुब्रम्हा गुरो विष्णु गुरुर्देव महेश्वर ॥ गुरूरेव परं ब्रम्ह तस्मै श्री-
गुरवे नमः ॥ ३६ ॥ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ॥
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ३७ ॥ अखंडमंडला-
कारं व्याप्तं येन चराचरं ॥ त्वत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः

॥ ३८ ॥ स्थावरं जंगमं व्याप्तं यत्किंचित्सचराचरं ॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ३९ ॥ सर्वश्रुतिशिरोरत्न-विराजितपदांबुजं ॥ वेदांतगर्भसूर्याय तस्मै श्रीगुरवे नमः ॥ ४० ॥ चिन्मयं व्यापितं सर्वं त्रैलोक्यं सचराचरं ॥ असी ॥ ११ ॥

११ ॥

पदंदर्शितंयेनतस्मैश्रीगुरवेनमः॥ ४१॥ यस्यस्मरण
मात्रेणज्ञानमुत्पद्यतेस्वयं॥ सैदेवसर्वसंपत्तितस्मै-
श्रीगुरवेनमः॥ ४२॥ चैतन्यंशाश्वतंशांतंव्योमातीतं-
निरंजनं॥ बिंदुनादकलातीतंतस्मैश्रीगुरवेनमः॥ ४३॥

स्थावरं अचलं शांतं जंगमं चरमेव च ॥ येन व्याप्तं जग-
त्सर्वं तस्मै श्रीगुरवे नमः ॥ ७७ ॥ ज्ञानशक्तिसमारूढं त-
त्वमालाविभूषितं ॥ भुक्तिमुक्तिप्रदातारं तस्मै श्री-
गुरवे नमः ॥ ७८ ॥ अनेकजन्मसंप्राप्तकर्मबंधविदाहनं

॥ स्वात्मज्ञानप्रभावेन तस्मै श्रीगुरवे नमः॥ ७६॥ शोषकं-

भवसिंधुश्च दीपनं ज्ञानसंपदः॥ गुरुपादोदकं सम्यक्-

तस्मै श्रीगुरवे नमः॥ ७७॥ न गुरोराधिकं तत्त्वं न गुरोराधि-

कं तपः॥ तत्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः

॥ ४८ ॥ मन्नाथश्रीजगन्नाथ मद्गुरुः श्रीजगद्गुरुः ॥ ममा- ॥ १३ ॥
त्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ ४९ ॥ ध्यान-
मूलं गुरोर्मूर्तिं पूजामूलं गुरोः पदं ॥ मंत्रमूलं गुरोर्वाक्यं-
मोक्षमूलं गुरोः कृपा ॥ ५० ॥ गुरुरादिरनादिश्च गुरुः परम-

॥ १३ ॥

दैवतं ॥ गुरोःपरतरं नास्ति तस्मै श्रीगुरवे नमः

॥ ५१ ॥ सप्तसागरपर्यंतं तीर्थस्नानादिकं फलं ॥ गु:

रोरंघ्रीजलं बिंदुः सहस्रांशेन दुर्लभः ॥ ५२ ॥ गुरुरे-

वजगत्सर्वं ब्रम्हाविष्णुशिवात्मकं ॥ गुरोःपरतरं

नास्ति तस्मात्संपूजयेद्गुरुं ॥५३॥ ज्ञानविज्ञान- ॥ १४॥

सहितं लभते गुरुभक्तितः॥ गुरुसामान्यतो-

नास्ति ध्येयोसौ गुरुमार्गिणः॥ ५४॥ यस्मात्प-

रतरं नास्ति नेति नेतीति वा श्रुतिः॥ मनसाव-

चसा चैव सर्वदाराधयेद्गुरुं॥ ५५॥ गुरुकृपात्र-

॥ १४ ॥

सादेन ब्रम्हाविष्णुशिवादयाः॥ सामर्थ्यंतत्प्रसादे-
नकेवलं गुरूसेवया॥ ५६॥ देवकिंनरगंधर्वाः पितरो-
यक्षचारणाः॥ मुनयोपिनजानंति गुरूसुश्रुषणेविधिं
॥ ५७॥ मदाहंकारगर्वेण विद्यातपबलान्विताः॥ संसार

कुहरावर्तघटयंत्रे घटोयथा ॥ ५८ ॥ नमुकादेवगंधर्वाः - ॥ १८ ॥
पितरायक्षकिंन्नराः ॥ रुषयः सर्वसिध्दात्मा गुरुसेवा-
परोत्सुरवाः ॥ ५९ ॥ ध्यानं श्रुणु महादेवी सर्वानंदप्र-
दायकं ॥ सर्वसौरव्यकरं नित्यं भुक्तिमुक्तिविशारदं
॥ १९ ॥ ॥ ६० ॥ श्रीमत्परं ब्रम्हगुरुं वदामि श्रीमत्परं ब्रम्हगुरुं भजामि ॥

श्रीमत्परं ब्रम्ह गुरुं स्मरामि श्रीमत्परं ब्रम्ह गुरुं नमामि
॥ ६१ ॥ ब्रम्हानंदं परमसुखदं केवलं ज्ञानमूर्तिं द्वंद्वातीतं-
गगनसदृशं तत्वमस्यादिलक्षं ॥ येकं नित्यं विमल-
मचलं सर्व धीसाक्षिभूतं भावातीतं त्रिगुण रहितं-
सद्गुरुं तन्नमामि ॥ ६२ ॥

नित्यं शुद्धं निराभासं निराकारं निरंजनं ॥ नित्यबोध- ॥ १६ ॥
चिदानंद गुरु ब्रम्ह नमाम्यहं ॥ ६३ ॥ हृदंबुजे कर्णिक-
मध्यसंस्थं सिंहासने संस्थित दिव्यमूर्तिं ॥ ध्यायेद्गुरुं
चंद्रकला प्रकाशं सचित्सुखाभिष्टवरं दधानं ॥ ६४ ॥
॥ श्वेतांबरं श्वेतविलेपपुष्पं मुक्ताफलं भूषित दिव्यमूर्तिं ॥
१६ ॥

वामांकपीठस्थितदिव्यशक्तिं मंदस्मितं पूर्णकृपा-
निधानं ॥६५॥ आनंदमानंदकरप्रसन्नं ज्ञानस्वरू
पं निजबोधयुक्तं ॥ योगींद्रमीड्यं भवरोगवैद्यं श्री-
मद्गुरुं नित्यमहं नमामि ॥६६॥ यस्मिन्सृष्टिस्थिति-
ध्वंसपिधानानिग्रहात्मकं ॥ कृत्यं पंचाविधं शश्व-

भासते तन्नमः शिवं ॥ ६७ ॥ प्रातः शिरसी शुक्लाब्जे द्वि- 
नेत्रं द्विभुजं गुरुं ॥ वराभयप्रदं शांतं स्मरेत्तन्नामपूर्वकं
॥ ६८ ॥ न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं ॥
शिवशासनतः शिवशासनतः शिवशासनतः शिवशास
नतः ॥ ६९ ॥ इदमेव शिवं इदमेव शिवं इदमेव शिवं-

इदमेव शिवं ॥

मम शासनतो मम शासनतो मम शासनतो मम-
शासनतः ॥ ७० ॥ एवंविधं गुरुं ध्यात्वा ज्ञानमुत्पद्यते-
स्वयं ॥ तदा गुरुप्रसादेन मुक्तोहं इति भावयेत
॥ ७१ ॥ गुरुणा दर्शितं मार्गं मनः शुद्धिं च कारयेत ॥ अनि-
त्यं खंडयत्सर्वं यत्किंचिदात्मगोचरं ॥ ७२ ॥

ज्ञेयं सर्वमिनिसंच ज्ञानंच्यमनुउच्यते ॥ ज्ञानं ज्ञेयं ॥१८॥
समं कुर्य्यान्नान्यो ह्यर्थो द्वितीयकः ॥ ७३ ॥ एवं श्रु-
त्वा महादेवी गुरुनिंदां करोति यः ॥ स याति नरके घोरे
यावच्चंद्र दिवाकरो ॥ ७४ ॥ यावद्देहांतकत्पोस्ति ताव-
द्देवीं गुरुं स्मरेत ॥ गुरुलोपो न कर्तव्यः स्वछंदो यदि-
॥१८॥

भावयेत ॥ ७५ ॥ हुंकारेणनवक्तव्यंअसह्यंचकदा-

चन ॥ गुरुरग्रेनवक्तव्यं तुंकारंच कुदाचन ॥ ७६ ॥

यो वै हुंकृत्य तुंकृत्य गुरुं निर्जित्य वादतः ॥ अरण्ये -

निर्जले देशे सभवे ब्रह्मराक्षसः ॥ ७७ ॥ मुनिभिः पन्न

गैर्वापि सुरैर्वा शापितो यदि ॥ कालमृत्युभयाद्वा-

पिगुरुरक्षास्तिपार्वति ॥ ७८ ॥ अशक्ताहि सुराः सर्वे ॥ १५ ॥
ह्यशक्ता मुनयस्तथा ॥ गुरुशापहताः क्षीणा क्षयं यान्ति-
नसंशयः ॥ ७९ ॥ मंत्रराजमिदं देवी गुरुरित्यक्षरद्वयं ॥
श्रुतिवेदांतवाक्येन गुरुः साक्षात्परं पदं ॥ ८० ॥ श्रुतिस्मृति
मविज्ञाय केवलं गुरुसेवया ॥ ते वै संन्यासिनः प्रोक्ता

इतरेवेषधारिणः ॥ ८१ ॥ नित्यं ब्रम्ह निराकारं नि-
र्गुणं बोधयत्परं ॥ पूर्ण ब्रम्ह निराभासं दीपोदीपांतरं -
यथा ॥ ८२ ॥ गुरुकृपाप्रसादेन आत्मारामो हि लभ्यते ॥
अनेन गुरुमार्गेण स्वात्मज्ञानं प्रवर्तते ॥ ८३ ॥ आब्र-
म्ह स्तंभपर्यंतं परमात्मास्वरूपकं ॥ स्थावरं जंगमं चैव

प्रणमामिजगन्मयं ॥८४॥ वंदेहंसच्चिदानंदंभेदातीतं ॥२॥

श्रीसद्गुरुं॥ नित्यपूर्णं निराकारं निर्गुणंस्वात्मसंस्थितं

॥ ८५॥ परात्परतरंध्येयंनित्यमानंदकारकं ॥ हृदयाकाश

मध्यस्थंशुद्धंस्फटिकसंनिभं ॥ ८६॥ स्फटिकप्रातिमारूपं

दृश्यतेदर्पणेयथा ॥ तथात्मानं चिदाकाशंमानंदंसोह-

॥ २ ॥

मित्सुतं ॥ ८७ ॥ अंगुष्ठमात्रं पुरुषं ध्यायेच्च चिन्मयं हृदि ॥

तत्रस्फुरति यो देवः श्रुत्वा तं कथयाम्यहं ॥ ८८ ॥ अगो-

चरं तथागम्यं रूपनामादिवर्जितं ॥ निःशब्दं तु विजा-

नीयात्स्वभावं ब्रम्हपार्वति ॥ ८९ ॥ यथानिजस्वभाव-

न तथा ब्रम्ह च शाश्वतं ॥ शीतोष्णादिस्वभावेन

कर्पूरं कुंकुमादिकं ॥ ९० ॥

स्वयंसर्वमयोभूत्वास्थातव्यंयत्रकुत्रचित॥ कीटो- ॥ २१ ॥
भृंगीरिवध्यानंयथाभवतितादृशं॥ २१॥ गुरुध्यानं-
तथानित्यंदेहीब्रंम्हस्वयंभवेत॥ पिंडपदेतथारूपे
मुक्तोस्तेनात्रसंशयः॥ २२॥ पार्वत्युवाच॥ पिंडंकिंतु
महादेव पदंकिंतुमुदाहृतं॥ रूपरूपातितंचैव-
॥ २२ ॥

एतदाख्याहि शंकर ॥ ८३ ॥ ईश्वरोवाच ॥ पिंडं कुंडलि-
नी शक्तिः पदं हंसमुदाहृतं ॥ रूपं बिंदुरिति ज्ञेयं रूपातीतं-
निरंजनं ॥ ८४ ॥ स्वयं सर्वमयं भूत्वा परंब्रम्ह विलोकयेत ॥
परात्परतरं नान्यत्सर्वमेव निरालयं ॥ ८५ ॥ यस्या-
वलोकनादेव सर्वसंगविवर्जिताः एकाकी निस्पृहः

शांतःस्यात्त्वंतत्प्रसादतः ॥ ८६ ॥ ऋब्धंवायनऋद्धं- ॥ २२ ॥
वा स्वल्पंवाबहुळंतथा ॥ निष्कामेनैवभोक्तव्यंसदा-
संतुष्टमानसः ॥ ८७ ॥ सर्वज्ञपदमित्याहुर्देहीसर्व-
मयोविदुः ॥ सदानंदःसदा शांतोरमतेयत्रकुत्रचित्
॥ २३ ॥ ॥ ८८ ॥ यत्रैवातिष्ठतेसोपिसंदेशः पुण्यभाजनः ॥

मुक्तिस्थलं क्षणं देवी तवाग्रे कथितं मया ॥ ९९ ॥ उप
देशो मया देवी गुमार्गेण दर्शितः ॥ गुरुभक्तिस्तथा ज्ञानं
सकलं तव कीर्तितं ॥ १०० ॥ अनेन तद्भवत्कार्यं यद्वक्ष्यामि-
महातपे ॥ लोकोपकारकं देवी लौकिकं तु न भावयेत
॥ १ ॥ लौकिकं कर्मतो याति ज्ञानहीनो भवार्णवं

ज्ञानिनो भावयत्सर्वं कर्मनिःकर्मशाप्यति॥ २८ ॥ २३ ॥
इदं तु भक्तिभावेन पठ्यते श्रुयते यदि ॥ लिखित्वा
यत्प्रदातव्यं तत्सर्वं सफलं भवेत् ॥ ३ ॥ गुरुगीताभिदं
देवी शुद्धं तत्वमयोदितं ॥ भवव्याधिविनाशार्थं
॥ २३ ॥ स्वयमेव सदा जपेत ॥ ४ ॥ गुरुगीताक्षरैकैकं

मंत्रराजमिदं प्रिये ॥ अन्ये च विविधा मंत्राः फला

नाहंति शोढशीं ॥ ५ ॥ अनंत फलमाप्नोति गुरुगी-

ताजपेन तु ॥ सर्व पाप समूह घ्नं सर्व दारिद्र्य नाशनं

॥ ६ ॥ अकाल मृत्यु हरणं सर्व संकट नाशनं ॥ यक्ष

राक्षस भूतानां चोर व्याघ्र भयापहं ॥ ७ ॥ महात्म्या

धिहरं चैव विभूति सिद्धिदा भवेत ॥ अथवा मोह- ॥ २४ ।
नं वश्य स्वयमेव जपेन्नरः ॥ ८ ॥ कुशैर्वा दूर्वया दे-
वी आसने शुभ्र कंबले ॥ जपे वश्यततो देवी जपे देका-
ग्रमानसः ॥ ९ ॥ शुक्लासनं वशा सर्व वश्ये रक्तासनं
प्रिये ॥ अभिचारे कृष्ण वर्णं पीतवर्णं धनागमे ॥ १० ॥
॥ २४ ॥

उत्तरे शांति जाप्यं वाद्धस्ये पूर्वमुखोदितं ॥
दक्षिणे मारणं प्रोक्तं स्तंभने पश्चिमे मुखं ॥११॥
मोहनं सर्वभूतानां बंधमोक्षकरं परं ॥ इवभूप-
प्रियकरं राजानां वश्यमानयेत ॥१२॥ मुखस्तं-
भकरं नृणां सद्गुणानां विवर्धनं ॥ दुष्कर्मनाश-

नं चैव सुकर्म सिद्धिदं भवेत् ॥ १३ ॥ सर्वशांतिकरं
नित्यं वंध्यापुत्रफलप्रदं ॥ अवैधव्यं करं स्त्रीणां सौ
भाग्यदायकं परं ॥ १४ ॥ असिद्धं सिद्धयेत्कार्यं न-
व ग्रहभयापहं ॥ दुस्वप्ननाशनं चैव सुस्वप्नप्र-
॥ २५ ॥ दायकं ॥ १५ ॥ आयुरारोग्यमैश्वर्यं पुत्रपौत्रविव-

धनं ॥ निष्कामस्तु वारं वाजपेन्मोक्ष्न मवाप्नुयात्
॥ १६ ॥ अवैधव्यं सकामेन लभेतवान्य जन्मनि ॥ सर्व
दुःखभयं विघ्नं नाशय चापहारकं ॥ १७ ॥ सर्वबा-
धाप्रशामनं धर्मार्थकाममोक्षदं ॥ यं यं चिंतयेत-
कामं तं तं प्राप्नोत्यसंनंदनं ॥ १८ ॥ कामितस्यकाम-

धेनुः कल्पितस्याकल्पद्रुमः ॥ चिंतामणीश्चेति तस्य ॥ २६ ॥
सर्वमंगलकारकं ॥ १९ ॥ मोक्षहेतुर्जपेन्नित्यं मो-
क्षश्रेयं स्यवाप्नुयात ॥ भोगकामजपे द्यो वै तस्य-
कामफलं प्रदं ॥ २० ॥ जपे छातैश्च सौरैश्च गाण-
पत्यैश्च वैष्णवे ॥ शैवैश्चासिद्धिदं देवी सत्यं सत्यं
॥ २६ ॥

नसंशयः ॥ २१ ॥ अथकाम्यजपस्थानेकथयामिवरानने ॥ सागरे सरिता तीरे तीर्थे हरि हरालये ॥ २२ ॥ शक्तिदेवालये गोष्ठे सर्वदेवालये शुभे ॥ वटस्थधात्रिमूलेवा मठेवृंदावनेतथा ॥ २३ ॥ पवित्रे निर्मले स्थाने नित्यानुष्ठानतोपिवा ॥ निर्वेद्दने

नमौनेनजपमेत त्समाचरेत्॥२४॥गुरुपुत्रव-
रो मुख्योतथासिंध्यंतिनान्यथा॥ शुभकर्माणि-
सर्वाणिदिक्षादीक्षादिसिद्धिदा॥२५॥संसार मू-
कनाशार्थंभवपाशानिकृंदनं॥ गुरुगीतां वसुस्ना-
तं तत्वज्ञः कुरुतेसदा॥ २६॥ सएव राघवः साक्षा-

॥ २८ ॥

त्सदसत्ब्रम्हविचक्षणः॥ तस्यास्थानानि सर्वाणि-
पवित्राणिनसंशयः॥ २७॥ सदेशःशुद्धो यशसो-
स्वभावायत्रातिष्ठति॥ तत्रदेवगणाःसर्वक्षेत्रपी-
ठेवसंतिहि॥ २८॥ असनस्थोशयनस्थोगछं-
तिष्ठंतथापिवा॥ अश्वारूढोगजारूढोसुषुप्तो-

जाग्रतोपिवा ॥२९॥ शुचिर्भान्मान्मानसज्ञानी गुरु-" २८॥
गीताजपनतु ॥तस्यदर्शणमात्रेणपुनर्जन्मनाविद्यते
॥ ३०समुद्रस्ययथातोयंक्षीरेक्षीरंजलेंजले ॥ भिन्ने-
कुंभेयथाकाशंतथात्मापरमात्मनो ॥३१॥ तथैव-
ज्ञानी।जीवात्मापरब्रम्हणिलीयते ॥ऐक्येनरम-
॥२८॥

तेइचानी यत्रतत्रा दिवा निशं ॥ ३२ ॥ एवंविधौ-
महामुक्तः सर्वदावर्तते स्वयं ॥ तस्मै सर्वप्रयाले-
नभक्तिभावंकरोतियः ॥ ३३ ॥ गुरौसंतोषितेसर्वे
मुक्तास्तेनात्रसंशयः ॥ भुक्तिमुक्तिदयातेषां जिह्वा-
ग्रेचसरस्वती ॥ ३४ ॥ अनेन प्राणिनःसर्वे गुरुगीता-

जपान्वितः॥ सर्वसिद्धिमवाप्नोति भुक्तिं मुक्तिं न- ॥२८॥

संशयः॥ ३५॥ सस्यं सस्यं पुनः सत्यं निजधर्मो मयो-

दितः॥ गुरुगीता समं नास्ति सत्यं सत्यं वरानने ॥ ३६ ॥

गुरुर्देवो गुरुर्धर्मो गुरुर्निष्ठा परंतपः॥ गुरोः परतरं नास्ति-

नास्ति तत्वं गुरोः परं ॥ ३७॥ धन्या माता पिता धन्यो धन्यो

॥ २८ ॥

वंशकुलंतया ॥ धंन्याचवसुधादेवी गुरुभक्तिः सुदुर्लभः
॥ ३८ ॥ शरीरमिंद्रियंप्राणअर्थस्वजनबांधवः ॥ पितामाताकु-
लंदेवी गुरुरेवनसंशयः ॥ ३९ ॥ अकल्पजन्मनांकोठ्यांजप-
व्रततपःक्रिया ॥ तत्सर्वंसफलंदेवी गुरुःसंतोषमात्रतः
॥ ४० ॥ विद्याधनमदेनैवमंदभाग्याश्चयेनराः ॥ गुरुसेवा-

नकुर्वंतिसहस्रंसत्यंवदाम्यहं ॥४१॥ ब्रम्हाविष्णुमहेशा ॥ ३० ॥
दिदेवार्षिपितृकिंन्नराः ॥ सिद्धचारणयक्षाश्चमुनयश्चत-
पोधनः ॥४२॥ गुरुसेवापरंतीर्थं अन्यतीर्थंनिरर्थकं ॥
सर्वतीर्थाश्रयंदेवीसद्गुरोःचरणांबुजं ॥४३॥ इदंरहस्यं
॥ ३० ॥ नवाच्यंतवाग्रेकथितंमया ॥ सुगोप्यंचप्रयत्नेनयेत्नाम्नः

त्वं प्रयास्यसि ॥ ४४ ॥ स्वाभिमुख्य गणेशादि वैष्णवानां-
च पार्वती ॥ मनसापि न वक्तव्यं मम सन्निधिकारकं ॥ ४५ ॥
अतो वा चेत शांतस्य श्रद्धाभक्ति समन्वितः ॥ प्रवक्तव्यं-
मिदं देवी ममात्मासि सदा प्रिये ॥ ४६ ॥ अभक्ते वंचके-
धूर्ते पाखंडे नास्तिके नरः ॥ मनसापि न वक्तव्यं गुरु

गीताभिदं प्रिये ॥ ४७ ॥ गुरवो बहवः संती शिष्यवित्ता- 
पहारकाः ॥ दुर्लभोयं गुरूर्देवी शिष्यसंतापहारकः ॥ ४८ ॥
संसारसागरसमुद्धरणैकमंत्रं ब्रम्हादिदेवमुनिपू-
जितसिद्धमंत्रं दारिद्रदुःखभयशोकविनाशमंत्रं वंदे
महाभयहरं गुरुराजमंत्रं ॥ ४९ ॥ ॐ तत्सदिति श्री-
 स्कंदपुराणे उत्तरखंडे ईश्वरपार्वति संवादे गुरुगीता-

संपूर्णमस्तु ॥ श्रीगुरुदेवतार्पणमस्तु ॥ विक्रमनाम ३२
नामसंवत्सरे ॥ मार्गशीर्ष कृष्ण २ भृगुवासरे ॥ कष्टेन
लिखित ग्रंथं यत्नेन प्रतिपाल्यतं ॥ यादृशं पुस्तकं दृ-
ष्ट्वा तादृशं लिखितं मया ॥ स्वार्थार्थं परोपकारार्थं ॥
श्रीराम जयराम जयजयराम
हरेराम हरेराम राम राम हरे हरे

गुरुगीता समाप्तः

[OrderDescription]
,CREATED=06.02.20 12:07
,TRANSFERRED=2020/02/06 at 12:14:45
,PAGES=65
,TYPE=STD
,NAME=S0002749
,Book Name=M-2504-SHRIGURUGEETA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,